# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ९६

अवाङ्मुखमथो दीनं दृष्ट्वा सोममिवाप्लुतम् ।
राघवं लक्ष्मणो वाक्यं हृष्टो मधुरमब्रवीत् ॥ १॥

न सन्तापं महाबाहो मदर्थं कर्तुमर्हसि ।
पूर्वनिर्माणबद्धा हि कालस्य गतिरीदृशी ॥ २॥

जहि मां सौम्य विस्रब्धः प्रतिज्ञां परिपालय ।
हीनप्रतिज्ञाः काकुत्स्थ प्रयान्ति नरकं नराः ॥ ३॥

यदि प्रीतिर्महाराज यद्यनुग्राह्यता मयि ।
जहि मां निर्विशङ्कस्त्वं धर्मं वर्धय राघव ॥ ४॥

लक्ष्मणेन तथोक्तस्तु रामः प्रचलितेन्द्रियः ।
मन्त्रिणः समुपानीय तथैव च पुरोधसं ॥ ५॥

अब्रवीच्च यथावृत्तं तेषां मध्ये नराधिपः ।
दुर्वासोऽभिगमं चैव प्रतिज्ञां तापसस्य च ॥ ६॥

तच्छ्रुत्वा मन्त्रिणः सर्वे सोपाध्यायाः समासत ।
वसिष्ठस्तु महातेजा वाक्यमेतदुवाच ह ॥ ७॥

दृष्टमेतन्महाबाहो क्षयं ते लोमहर्षणम् ।
लक्ष्मणेन वियोगश्च तव राम महायशः ॥ ८॥

त्यजैनं बलवान्कालो मा प्रतिज्ञां वृथा कृथाः ।
विनष्टायां प्रतिज्ञायां धर्मो हि विलयं व्रजेत् ॥ ९॥

ततो धर्मे विनष्टे तु त्रैलोक्ये सचराचरम् ।
सदेवर्षिगणं सर्वं विनश्येत न संशयः ॥ १०॥

स त्वं पुरुषशार्दूल त्रैलोक्यस्याभिपालनम् ।
लक्ष्मणस्य वधेनाद्य जगत्स्वस्थं कुरुष्व ह ॥ ११॥

तेषां तत्समवेतानां वाक्यं धर्मार्थसंहितम् ।
श्रुत्वा परिषदो मध्ये रामो लक्ष्मणमब्रवीत् ॥ १२॥

विसर्जये त्वां सौमित्रे मा भूद्धर्मविपर्ययः ।
त्यागो वधो वा विहितः साधूनामुभयं समम् ॥ १३॥

रामेण भाषिते वाक्ये बाष्पव्याकुलितेक्षणः ।
लक्ष्मणस्त्वरितः प्रायात्स्वगृहं न विवेश ह ॥ १४॥

स गत्वा सरयूतीरमुपस्पृश्य कृताञ्जलिः ।
निगृह्य सर्वस्रोतांसि निःश्वासं न मुमोच ह ॥ १५॥

अनुच्छ्वसन्तं युक्तं तं सशक्राः साप्सरोगणाः ।
देवाः सर्षिगणाः सर्वे पुष्पैरवकिरंस्तदा ॥ १६॥

अदृश्यं सर्वमनुजैः सशरीरं महाबलम् ।
प्रगृह्य लक्ष्मणं शक्रो दिवं सम्प्रविवेश ह ॥ १७॥

ततो विष्णोश्चतुर्भागमागतं सुरसत्तमाः ।
हृष्टाः प्रमुदिताः सर्वेऽपूजयनृषिभिः सह ॥ १८॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com